श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

## श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ अभयप्रदानस्तबकः एकोनविंशः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ अभयप्रदानस्तबकः एकोनविंशः ॥

अभयं भयमित्येतदुभयं सर्वदेहिनाम्।
यत्सेवातदभावाभ्यां तामहं श्रियमाश्रये॥ **19.1** ॥

भजामि तां त्वां भवरोगभीतिं
पयोधिकन्ये परिहर्तुकामः।
वह्लेर्भयं वायुभुवो ययैव
न्यवारि तस्माच्च निशाचरीणाम्॥ **19.2** ॥

प्रह्लादस्य भयं विनेतुमचिरादेकस्य शोकस्पृशो
लोकस्यैव भयङ्करं तव पतिर्जग्राह सैंहं वपुः।
त्रैलोक्याम्ब तदीयकोपदहन ज्वालास्तु वेलातिगाः
चाटूक्तैरमृतैर्निवार्य भवती चक्रे जगन्निर्भयम्॥ **19.3** ॥

अशरण जनक्लेशालोक क्षणोपनतोद्गतेः
स तव हृदयग्लानेर्भीतो जगत्पतिरिन्दिरे।
अहह विहिते क्षाम्यन्नागः सहस्रमजस्रम -
प्युभयमुभयोरार्तेभ्यः नः प्रयच्छति लोकयोः॥ **19.4** ॥

मुक्तस्त्वया मुह्यति साध्वसं गतः
सर्वाम्ब युक्तं खलु साध्वसङ्गतः।
यस्त्वामुपासीत भयातिचञ्चलां
चित्रं स धन्यो न भयाति चञ्चलः॥ **19.5** ॥

वन्देत मन्देतरनित्यबोधा
    नन्दे मुकुन्देष्टपुरन्ध्रि यस्त्वाम्।
अत्रासमत्रासनमेति सैंहं
    चित्राममुत्रापि स याति ऋद्धिम्॥ **19.6**॥

कारागारादपि किल भृशं तापदे पापदेहे
    हन्ताहन्तामतिमति विपन्मिश्रितामाश्रितानाम्।
पारावाराधिपतितनये मादृशामीदृशानां
    हित्वा हि त्वा त्रिजगति गतिर्नेतरा कातराणाम्॥ **19.7**॥

भावी यस्मिन् भगवति भवद्दृष्टिलेशः कृतार्थे
    त्रासो न्यासोपहत विपदस्तस्य न स्यात् कुतोऽपि।
अस्मिन्नर्थे जननि सुरसासिंहिकादेरभीतो
    लङ्कायामप्यविहतगती रामदासः प्रमाणम्॥ **19.8**॥

जनिमृतिजराभीष्माद्ग्रीष्मातपोग्रतराद्भवात्
    जननि न वयं वित्रस्यामस्त्वदङ्घ्रिमुपाश्रिताः।
सति बलवदालम्बे स्याद्दुर्बलोऽप्यकुतोभयः
    त्रसति मृगयोः किं वा पद्मे मृगो विधुमाश्रितः॥ **19.9**॥

अनाघ्राताः श्रौताः स्मृतिभिरुपदिष्टाश्च कमले
    समीचामाचारैरपि च विदिता धर्मनिचयाः।
कथङ्कारं घोरं निरयमतियायामिति भयं
    जहामि स्मृत्वा ते जगदवनि वात्सल्यजलधेः॥ **19.10**॥

विवित्सामात्सर्यस्फुरण दुरहङ्कार कुहना -
    पिशाचीभ्यो बिभ्यज्जगदभयदानैकनिरताम्।
नुतां भूतेशाद्यैरपगमित रक्षोगणमदां
    प्रपद्ये दासस्त्वां परमपुरुषप्राणदयिते॥ **19.11**॥

जन्तोर्हन्त त्रिलोकीजननि तव समाराधने साधनेषु
व्यापारेष्वाभिमुख्यत्यजन भजनयोर्भीत्यभीती भवेताम्।
सुग्रीवं वालिभङ्गे तदहितदमनानुन्मुखं रामकोपात्
भीतं पश्चात्तदास्थावहनगतभयं तत्र दृष्टान्तयामः॥ **19.12** ॥

रक्षःस्तोमोऽप्यखिलभयकृद् राघवप्राणकान्ते
त्रासोत्पत्त्यै न खलु भवति त्वत्पदाब्जानुकूले।
कष्टं मातस्तृणमपि भिये कल्पते त्वत्प्रतीपे
प्राच्ये साक्षी पवनतनयः पश्चिमे काक एकः॥ **19.13** ॥

कान्तारे महतीव संसृतिपथे हन्त भ्रमन्तश्चिरं
विष्णोः प्रेयसि वानरा इव नरा वेलातिगग्लानयः।
सम्पातेरिव सन्मतेरथ गुरोर्बुद्ध्वा स्थितिं तावकीम्
आज्ञालङ्घन भीतिमम्ब जहति प्राज्ञा हरेः स्वामिनः॥ **19.14** ॥

पादाब्जं भजनादिकर्मणि सुरैर्यस्यैव कर्मीकृतं
यो धत्तेऽर्कयमेन्द्रवह्निमरुतां भीतावपादानताम्।
तस्याप्यम्ब सकृत्कृत प्रपदनस्तेऽस्मीति याचन् जनो -
ऽप्यत्रासार्पणसंप्रदानमभवद्देवि प्रसादेन ते॥ **19.15** ॥

आरोढुं किल यत्सनीडममरा बिभ्यत्यहिद्विण्मुखाः
तद् ब्रह्मापि तवाश्रयेण सुलभीकर्तुं न भीतोऽस्म्यहम्।
लेढुं दाडिमकल्परत्नखचितं राज्ञः किरीटं रमे
किं वा सर्वदुरासदस्य दयिताकेलीशुकस्त्रस्यति॥ **19.16** ॥

दातव्या स्वयमेव दाशरथये देवीति यो वीतभीः
अग्रे साग्रहमग्रजस्य कथयन्नार्तो दशास्यानुजः।
तस्मै त्वद्दयितेन दत्तमभयं प्राज्यं च राज्यं रमे
यत्स्वल्पं व्यसनं भवेत्तव कृते तद्भूयसे श्रेयसे॥ **19.17** ॥

तव साधु वर्ष्म नवसारसालये
    भवसागरान्तरवसादमेयुषाम्।
अभयाय भात्यशुभयातुदीप्तिहृत्
    प्रभया सुवर्णनिभया मनोरमम्॥ **19.18**॥

प्रत्यासीदति मृत्युरन्वहमहो गत्यागतिभ्यां रवेः
    पापीयानहमस्मि पापिनि जने कोपी च वैवस्वतः।
किं किं वा भवितेति वेङ्कटपतेः क्रीडासखि त्रस्यते
    मह्यं गर्ह्यतमाय मातरभयं देया दयालो स्वयम्॥ **19.19**॥

परब्रह्मप्राणप्रणयिनि हरब्रह्ममघवन् -
    मुखानां लेखानामपि भयमभीतिश्च भवतः।
निमेषोन्मेषाभ्यां तव जननि दृष्ट्योरिति महान्
    अयं घण्टाघोषः क इह विमृशेन्मानमपरम्॥ **19.20**॥

घनार्तौ कार्तान्तः कदननिपुणः किङ्करगणः
    भ्रमद्भिर्लोकाम्ब क्रुधमिव वमद्भिश्च नयनैः।
प्रगल्भां दुर्भीतिं प्रथयति यथा मे न बहुधा
    तथा शीतापाङ्गैः प्रसभमनुगृह्णातु भवती॥ **19.21**॥

तत्तत्पापव्रजफलतया दारुणैस्तन्यमाना
    याम्याः श्रुत्वा मुनिवचनतो यातनाश्चेतनानाम्।
कामं भीतः कमलनिलये कम्पमानाखिलाङ्गः
    विश्वस्य त्वामहमशरणो विश्वधात्रीं प्रपद्ये॥ **19.22**॥

देशे काले सततविकृतेः देवि देहस्य वृत्ते
    दृष्टे शौरेरघजुषि जने तीक्ष्णकोपे च चित्ते।
भीतिः प्रादुर्भवति महती शक्तिमत्या भवत्याः
    कारुण्यार्द्रे मृदुनि हृदये चिन्तिते हन्त धैर्यम्॥ **19.23**॥

बाधन्ते विषया बहिः सततमप्यन्तस्तु कामादयः
त्रातुं हन्त विपन्नमर्णवसुते धात्रादयोऽप्यक्षमाः।
शक्तो यद्यपि केशवः स तु दुराराध्यः स्वयं मद्विधैः
इत्युद्वेगवतो मम क्लमहरालोका त्वमेका गतिः॥ **19.24** ॥

वाल्मीकौ तमसान्वयो बलरिपौ भूयस्तरा मन्यवः
योगस्थे यमसङ्गतिर्दृढगदावाप्तिस्तु नारायणे।
रुद्रे क्षुद्रहितक्रमो भवकृतं दुःखं रतिप्रेयसि
त्रासः कुत्सितमौक्तिकेषु न पुनस्त्वत्संश्रितेष्विन्दिरे॥ **19.25** ॥

हन्त प्राकृतचक्षुराद्यविषये व्यापिन्यनिर्वाच्यतां
प्राप्ते विश्वजनिस्थितिक्षयपुषि ब्रह्मण्यनन्याश्रये।
मातस्त्वामभयं विधातुमुषितां मन्ये प्रतिष्ठामहं
तस्मिंस्ते दरमन्तरं भवति चेत्कस्यात्र न स्याद्भयम्॥ **19.26** ॥

दशमुखसहजं तं देवि नाम्नाऽर्थतो वा -
प्युदितमुखविकारं भीतमप्यूष्मणाप्तम्।
अकुरुत रघुवीरस्त्वत्प्रसादप्रभावात्
अभयवितरणेन क्षिप्रमानन्दसान्द्रम्॥ **19.27** ॥

अल्पश्रुतेभ्य इव राशिमनादिवाचाम्
अंहस्ततिभ्य इव बिभ्यतमर्भकं ते।
पुण्यैः पुराणवचनैरिव वीक्षणैस्त्वम्
उच्चैर्नृसिंहसखि मामुपबृंहयेथाः॥ **19.28** ॥

दुष्कालानुगुणक्रमैः श्रुतिपथाविष्कारनिष्कासकैः
निष्कारुण्यतमैस्तुरुष्कयवनैर्निष्कारणद्वेषिभिः।
कञ्जावासिनि तत्समैरपि जनैः सञ्जायमानं भयं
त्वं जालेन दृशां हि तारयसि नः खञ्जानिवाम्भोनिधिम्॥ **19.29** ॥

का काभयप्रदेति
    प्रश्नो यद्वाचकः समस्तपदः।
स्वयमुत्तरतां धत्ते
    रमा समस्तोत्तरा विराजति सा॥ **19.30**॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे अभयप्रदानस्तबकः एकोनविंशः॥